The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 01 | Issue: 04 | Dec-Feb 2025 | ISSN: 3048-9660 (Online) | www.thebrahmi.com

# रघुनाथभट्टकृता त्रिंशच्छलोकविवृत्यानुसारमाशौचव्यवस्था- एकमध्ययनम्

**Dr. Pranati Prava Panda**
Guest Lecturer, Rambag Regional Degree College, Jajpur

**सारांशः -**

सर्वेषामाशौचानां प्रतिपादनमूलकं त्रिंशच्छलोकी इत्याख्यग्रन्थस्य त्रिंशत् श्लोकानामुपरि रघुनाथभट्टेन त्रिंशच्छलोकविवृत्याख्या टीका कृता। ग्रन्थेऽस्मिन् प्रतिपादितानामाशौचानां गर्भपाताशौचादिक्रमेण विवरणमुपलभ्यते । एवं क्रमेण नालच्छेदानन्तरं जातस्य शिशोः मृत्युः भवति चेत् कीदृशमाशौचं, वयोऽवस्थादिविशेषेण मृतस्याशौचव्यवस्था, स्त्री अपत्यस्य मृतस्याशौचव्यवस्था, उपनयनादनन्तरमृतस्याशौचव्यवस्था, देशान्तरमृतस्याशौचव्यवस्था, मातृगृहे परिणितायाः दुहितायाः प्रसवे मरणे च आशौचव्यवस्था, आचार्यादिनां मरणाशौचव्यवस्था, आशौचसन्निपाते आशौचव्यवस्था, प्रेतनिर्हरणाद्याशौचव्यवस्था, अनुगमनाशौचव्यवस्था, ब्रह्मचारिणामाशौचव्यवस्था, देशान्तरमृतस्य मृतदेहालाभे आशौचव्यवस्था विषये च विवरणमुपलभ्यते। एतासामाशौचव्यवस्थानां विषये एकं संक्षिप्तविवरणमधः मया प्रदीयते ।

**मुख्यशब्दाः** –

आशौचम्, गर्भपाताशौचम्, शावमाशौचम्, शुद्धिः, सपिण्डानां, सद्यःशौचं, अहोरात्राशौचम्, त्रिरात्राशौचम्, दशाहादिशावमाशौचम् ।

**प्रस्तावना-**

अस्मिन् संसारे मानवाः विविधानि धर्म-कर्मादीनि कर्त्तव्यत्वेन परिपाल्यन्ते। एतेषां परिपालनं कदाचित् स्वीयकर्त्तव्यत्वेन कदाचित् सामाजिककर्त्तव्यत्वेन मानवाः साध्यन्ते। एतादृशेषु कर्मसु एकमवश्यपालनीयः कर्मस्तु अशौचम्। तत्र अशौचं नाम यन्न शौचम्। उपलभ्यते यथा शब्दकल्पद्रुमे शुचेः पवित्रतयाः भावः शौचं ततो नञ् तत्पुरुषः (न शुचिः अशुचिः) अर्थात् शुचित्वाभावः ।[1] किञ्च अशुचेर्भावः आशौचम् । अस्याशौचशब्दस्य निर्वचनं विज्ञानेश्वरेण[2] मिताक्षराटीकायां इत्थं कृतं यथा- **आशौचशब्देन कालस्नानाद्यपनोद्यः पिण्डोदकदानादिविधेरध्ययनादिपर्युदासस्य च निमित्तभूतः पुरुषगतः कश्चनातिशयः कथ्यते, न पुनः कर्मानधिकारमात्रम् ।**

अतः आशौचे कर्मणि अधिकारः नास्तीति नैव कथनीयं यतो हि प्रेतस्य पिण्डदानादि कर्मस्तु आशौचमध्ये अवश्यमेव कर्त्तव्यमिति। एवंविधाशौचविषये सूत्र-स्मृति-निबन्ध-भाष्य-टीकात्मकधर्मशास्त्रग्रन्थेषु धर्मशास्त्रकाराः विशदतया सूक्ष्मातिसूक्ष्मरूपेण समाजोपयोगी विवरणं प्रदत्तवन्तः । एतेषु भट्ट-रघुनाथेन आशौचसंग्रहरूपं त्रिंशच्छलोकी ग्रन्थस्योपरि त्रिंशचच्छलोकीविवृति नाम्ना एका टीका प्रणीता। अस्यां टीकायां गर्भपाताद्याशौचव्यवस्थाविषये ग्रन्थकारेण विविधस्मृतिपुराणादिवचनानामुद्धरणपूर्वकं स्वीयाभिमतप्रकटपूर्वकं पूर्वाचार्याणां मतखण्डनपूर्वकं सम्यक् विचारितम् । अस्मिन् विषये एकं संक्षिप्तविवरणमधुना प्रदीयते ।

तत्रादौ गर्भपाताशौचविषये रघुनाथेन विचारितः । यथा प्राप्यते त्रिंशच्छलोकीविवृत्याम् -

**षण्मासाभ्यन्तरेषु स्वपुरुषनिहिते गर्भमात्रे विनष्टे**
**माता तन्माससंख्या समदिनमशुचिः स्नानशुद्धाः सपिण्डाः।।**
**अंते मासद्वयेतुत्रिदिनमशुचयोऽतः परं सूतिवत्स्या-**
**च्चातुर्वणस्यतुल्यं भवति वयसि यत्प्रोच्यते शौचमात्रम् ।।**[3]

The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 01 | Issue: 04 | Dec-Feb 2025 | ISSN: 3048-9660 (Online) | www.thebrahmi.com

विवाहितानां स्त्रीणां स्वपुरुषनिहिते गर्भग्रहणे षण्मासाभ्यन्तरे गर्भविनष्टे मातुः माससंख्या-समदिनमशुचिः। अर्थात् षड्मासि गर्भपाते षड्दिवसं, पञ्चममासि गर्भपाते पञ्चदिवसं, चतुर्थमासि गर्भस्रावे चतुर्दिवसं तद् न्यूने अर्थात प्रथम-द्वितीय-तृतीयमासेषु गर्भस्रावे दिवसत्रयम् अशुचिः। अतः षण्मासाभ्यन्तरे गर्भनष्टे मातुः माससमसंख्यादिवसस्तु अशुचिः ऊर्ध्वे मासत्रये न तु आद्यमासत्रये इति। पुनः तत्र सपिण्डानां चतुर्थमासपर्यन्तं गर्भनष्टे सद्यःशौचं स्नानमात्रेण शुद्धिः विधीयते। पञ्चम-षष्ठमासद्वये गर्भपाते सपिण्डानां दिवसत्रयम् अशुचिः। तत्र गर्भापाताशौचं चतुर्णां वर्णानां तुल्यं भवति। पुनः षड्मासानन्तरं सप्तमादिमासेषु प्रसवे जीवतो निर्गमे सर्वेषां सूतकवत् म्रियतो निर्गमे मृतकवद्वा कार्याः अर्थात् दशाहादिशावमाशौचं सपिण्डेषु विधीयते जननेप्येवमेव स्यादिति ।

जन्माशौचमध्ये नालछेदनानन्तरं यदि जीवत उत्पन्नस्य शिशोः मृत्युः भवति किञ्च निष्प्राणो वा उत्पद्येत तदा उभयक्षेत्रे मातुः दशदिवसं पित्रादीनां च दिवसत्रयं जननिमित्तमाशौचं न तु शावमाशौचमिति। अर्थात् जन्मनिमित्ताशौचमाध्यमेनैव शिशोः मृत्युः निमात्ताशौचस्य निवृत्तिर्भवतीति ।[4]

ततः वयोऽवस्थादिविशेषेण जात्यशौचविषये उपस्थाप्यते रघुनाथेन, यथा- नामकरणात्प्राक् शिशोः नाशने स्नानमात्रेण शुद्धिः। दन्तजननात्प्राक् अपि तथैव सद्यः शुद्धिः। ततः चूडाकरणात्प्राक् अकृतचूडे त्रिवर्षं समाप्तिं यावत् वा शिशोः नाशने अहोरात्रमाशौचम्। चूडाकरणात्परम् अकृतचूडे त्रिवर्षात्परं वा उपनयनात्प्राक् बालकस्य मरणे त्रिदिवसमाशौचम्। परन्तु मातापित्रोस्तु नामकरणादुर्ध्वम् उपनयनपर्यन्तं पुत्रे उपरते त्रिदिनमाशौचम्। यथा प्राप्यते तत्रैव-

**स्नानं प्राङ्नामतोऽर्वाग्दशनजननतोहः परेतेग्निदग्धे-**
**ऽदग्धेत्वत्रापि सद्यः तदूपरिदिनमात्र्यब्दतश्चौलशून्ये ।**
**सचौले तु त्रिरात्रं त्रिदिनमितरथाप्याव्रताज्जात्यशौचं**
**मातापित्रोस्तु पुत्रे त्रिदिनमदशने सन्निधौ नष्टचेष्टे ॥**[5]

पुनः स्त्री अपत्ये किञ्चित् भिन्नत्वं परिलक्ष्यते। यथा- द्विवर्षात् प्राक् मरणे सद्यः शौचम्, अकृतचूडासु प्रेतेषु सद्यः शौचम् स्नानमात्रेण शुद्धिः । तथैव वाग्दानतोऽर्वाक् कन्यासु प्रेतेषु अहोरात्रमाशौचं ज्ञातिभिः परिपाल्यन्ते। वाग्दानात्परं विवाहात्प्राक् कन्यायाः मरणे भर्तृगोत्रं स्वकं पितृगोत्रं च दिवसत्रयमाशौचं परिपाल्यते ।

ततः उपनयनात्परं जातस्य बालकस्य मरणे सर्वे सपिण्डाः वर्णानुसारेण निर्द्दिष्टमाशौचं परिपाल्यते। तत्र ब्राह्मण-क्षत्रिय-वैश्य-शूद्राः वर्णक्रमानुसारेण दश-द्वादश-पञ्चदश-त्रिंशदहोरात्राणि आशौचं परिपालयेयुः। पुनः स्वधर्मानुष्ठानपरः शूद्रः न तु त्रिंशद्दिवसमपि तु पञ्चदशाहोरात्राणि आशौचं परिपालयेत्। स्वकुले जातः वानप्रस्थी-यति-नपुंसकानां मृत्युः भवति चेत् स्नानमात्रेण शुद्धिर्भवति। तथैव स्त्री-गो-विप्राणां रक्षणार्थं यदि मरणं भवति तर्हि अहोरात्रमाशौचम्। एतादृशः मरणं यदि युद्धक्षेत्रे भवति तर्हि सद्यः शौचम् ।[6]

पुनः देशान्तरमृतस्य मृत्युसंवादः दशाहादिशावमाशौच व्यतीते काले मासत्रयाभ्यन्तरे ज्ञाते त्रिरात्रमाशौचम् । मासत्रयादनन्तरं षण्मासाभ्यन्तरे ज्ञाते पक्षिणीं दिवसद्वयं मध्ये एकरात्रिम् आशौचं भवति । षण्मासतः नवमासाभ्यन्तरे ज्ञाते अहोरात्रमाशौचम्। नवमासादनन्तरं ज्ञाते स्नानमात्रेण शुद्धिर्भवति । प्राप्यते यथा तत्रैव त्रिंशच्छलोकविवृत्याम्-

**शावेतीते दशाहात्प्रभृतिविषयगेप्राक्त्रिमासात्रिरात्रम् ।**
**पक्षिण्याषष्ठमासाद्दिनमिहनवमात्स्यात्ततः स्नानमात्रम् ।।**[7]

परन्तु माता च पिता च पितरौ मरणे दशाहादि दिवसानन्तरं यदा कदापि यस्मिन् कस्मिन् देशेऽपि ज्ञाते पुत्रैः दशाहादि आशौचं स्वीयवर्णानुगुणं करणीयम् । प्रसङ्गेऽस्मिन् उपलभ्यते यत्- **अथ पितृमरणेदेशकालो विशेषात् स्वं स्वम्** ।[8] मातुः सपत्न्यादिमरणविषये कालान्तरे ज्ञाते न तु दशाहादि आशौचम् अपि तु दिवसत्रयम्। इदमाशौचकालातिक्रान्तौ यदाशौचं कथितं तत सर्ववर्णानां समानं न वर्णभेदाद्भिन्नम् ।

The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 01 | Issue: 04 | Dec-Feb 2025 | ISSN: 3048-9660 (Online) | www.thebrahmi.com

ततः मातापितृगृहे परिणीतायाः दुहितायाः प्रसवे मरणे च मातुः पितुः च यथाक्रमम् एकरात्रं त्रिरात्रं च आशौचम् अर्थात् प्रसवे एकरात्रं मरणे त्रिरात्रमिति । पितृमरणे कन्यानामूढानां त्रिरात्रमाशौचम्। अनूढानां तु पुत्रवदाशाचौम् । पुनः आचार्य-मातामह-दौहित्र-श्रोत्रिय-ऋत्विक्-सयाज्य-स्वपत्यादिमरणे शिष्यदौहित्रादयः त्रिरात्रमशुचयः स्युः। अस्मिन् प्रसङ्गे सपिण्डानां सोदकानां च प्रसवे मरणे च अहोरात्रत्रयमाशौचं भवति । तथैव ऋत्विक्, दौहित्रः, सहाध्यायी, आत्मबान्धवः, पितृबान्धवः, मातृबान्धवः, अन्तेवासी, शिल्पशिक्षार्थी, श्वश्रूः, श्वशुरः, सुहृद्, भगिनिका, भागिनेय, मातामही, मातृस्वसा, पितृस्वसा, मातुल, मातुलानी च मरणे पक्षिण्यशौचम्। स्वदेशाधिपतौ स्वग्रामाधिपतौ च मरणे सज्योतिराशौचम् अर्थात् दिवसे मरणे तद्दिवसं रात्रौ मरणे तद्रात्रिं च आशौचम्। पुनः शिष्यः, उपाध्यायः, बन्धुत्रयः, गुरुपुत्रः, आचार्यपत्नी, श्रोत्रियः, सगोत्रे जायमानः, समानग्रामीणः, मातुलः च मरणे निरूपकसम्बन्धिनाम् एकरात्रमाशौचम्। तथैव सब्रह्मचारी मरणे अपरे ब्रह्मचारिणः अहोरात्रमाशौचं परिपालयेत्। पुनः कथमपि स्वल्पसम्बन्धयुक्ते मृते सवस्त्रं स्नानेन जनः शुद्धिः भवति। एते सर्वे असपिण्डाशौचादयः सर्ववर्णेषु समानं भवति ।[9]

अधुना पूर्वप्रवृत्ताशौचमध्ये आशौचान्तर सन्निपाते आशौचव्यवस्था-विषये विचार्यते - तत्र पूर्वप्रवृत्ताशौचस्य मध्ये यदि अपरं समानं स्वल्पकं स्वजातिनिमित्तं जननमरणाशौचं वा यदि पतति तर्हि पूर्वप्रवृत्ताशौचस्य अवशिष्टदिनैव शुद्धिः, परन्तु तत्र यदि पूर्वाशौचस्य केवलम् अहोरात्रम् अवशिष्टं तर्हि इतोपि दिवसद्वयम् आशौचं परिपालनीयम् । पुनः केवलम् अन्तिमप्रहरावशिष्टे तत्परं दिवसत्रयम् आशौचं पालनीयमिति नियमः । पुनश्च पितुः मरणनिमित्ताशौचमध्ये मातुः मरणे न तु अवशिष्टदिवसैः शुद्धिः अपि तु मातुः निमित्तं पक्षिण्यधिकाशौचं परिपालयेत् । यथा प्राप्यते तत्रैव- **पितुरूपशमने पक्षिणीमातृमृत्यौ ।**[10]

ततः आशौचस्य प्रारम्भविषये प्राप्यते यत्- आहिताग्नौ मरणे दाहदिनात् दशाहशौचं प्रारभ्यते, स्मार्त्ताग्नौ मरणे च मरणदिवसात् दशाहाशौचं प्रारभ्यते। तत्र येषां यावानाशौचकालम् उक्तं तस्य समापनानन्तरं सचैलं स्नात्वा ते दैवपित्रादिकर्मणि कर्तुं योग्याः भवन्ति। एवमेव सूतिकायां मातुः कन्याजनने त्रिंशद्रात्रं पुत्रजनने विंशतिरात्रं दैवपितृकर्मणि अयोग्यः भवति ।[11]

इदानीं प्रेतनिर्हरणाद्याशौचविषये उपस्थाप्यते[12] - सवर्णमसपिण्डं प्रेतं स्नेहादिना निर्हरणे अहोरात्रमशुचिर्भवेत्। पुनः अनाथस्य प्रेतस्य निर्हरणे स्नानमात्रेण शुध्येत्। तथैव माता-पिता-आचार्य-उपाध्यायानां प्रेतनिर्हरणे ब्रह्मचारी व्रतात् भ्रष्टं न भवति । परन्तु एतेषामतिरिच्य अपरेषां प्रेतनिर्हरणे ब्रह्मचारी व्रतात् भ्रष्टं भवति, पुनरुपनयनं कुर्यात् ।

ततः अनुगमनाशौचविषये विचार्यते-

**तुल्योत्कृष्टानुयाने वसनसहितकोंभस्य वाप्लुत्यवह्निं**
**स्पृष्ट्वाज्यं प्राश्य शुद्धेदथ दिनमशुचिर्हीनवर्णानुयाने ।**
**पक्षिण्येकान्तरानुव्रजन इहभवेद्यन्तरत्वे त्रिरात्रं**
**कृत्वा स्नात्वा सुनद्यामसुयमनशतं सर्पिराशं च कुर्युः ॥**[13]

अतः सवर्णस्य प्रेतस्य उत्कृष्टवर्णस्य प्रेतस्य वा असपिण्डस्य श्मशानपर्यन्तमनुगमने सचैल स्नानपूर्वकं अग्निस्पर्शनं घृतप्राशनेन च जनः शुद्धिर्भवेत् । पुनः हीनवर्णस्य प्रेतस्यानुगमने अहोरात्रमाशौचं भवेत् । तत्रापि ब्राह्मणस्तु क्षत्रियस्य प्रेतस्यानुगमने अहोरात्रम्, वैश्यस्यानुगमने पक्षिणी, इतरानुगमने शूद्रादिनामनुगमने त्रिरात्रमाशौचं परिपालनपूर्वकं गङ्गादिपवित्रनद्यां स्नात्वा प्राणायामं शतं जप्वा घृतप्राशनपूर्वकं शुद्धिर्भवेत् ।

तदनन्तरं ब्रह्मचारिणामाशौचविषये आलोच्यते[14] - तत्र ब्रह्मचारी माता-पिता-आचार्य-उपाध्याय-मातामहादिनां कृते अग्निः उदकं तिलं च दत्त्वा तत्सम्बन्धिताशौचं परिपालयेत् । तद्भिन्नैः अग्नि-उदक-तिलादिकं च दत्त्वा ब्रह्मचारी पुनरुपनयनं कुर्यात् । पुनः ब्रह्मचारी अन्येभ्यो ज्ञातिकेभ्यो यदि अग्न्यादि ददति तर्हि तत्सम्बन्धिताशौचं परिपालनपूर्वकं

प्रायश्चित्तरूपेण कृच्छ्रत्रयं च कुर्यात् । तथैव ब्रह्मचारी स्वापेक्षया अधमवर्णस्यासपिण्डस्य प्रेतस्य दहनादि करणे यस्य दाहादिकं कुर्यात् तस्य वर्णमाप्नोति ।

पुनः यदा देशान्तरमृतस्य मृतदेहं न लभते तदा तस्य अस्थ्यादिना प्रतिकृतिं कृत्वा तदलाभे पलाशवृन्तनिर्मितां कुशमयीं प्रतिकृतिं निर्माय दाहादिकं कुर्यात् । तथा ज्ञातयः दशाहादिकं शावमाशौचमाचरेत् इतराः दिवसत्रयं शावमाशौचमाचरेत्। प्राप्यते यथा तत्रैव-

**पालाशीमाहिताग्निः प्रतिकृतिमथवास्थीनि दग्धा दशाहा-**

**द्याशौचाज्ज्ञातयः स्युस्तत इतर नृणां त्रीण्यहान्येव कुर्युः ।।**[15]

**निष्कर्षः -**

एवंरूपेण आशौचस्य मुख्यविन्दवः गर्भपाताद्याशौचविषये चर्चा क्रियते रघुनाथेन । एते विहाय कतिपयेषु इतरविषयेष्वपि चर्चा परिलक्ष्यते तद्यथा- आशौचे अस्पृश्यत्वविचारः, दासभेदे अस्पृश्यत्वकालभेदविचारः, नृप-दीक्षित-ऋत्विक्-भिषक्-आतुरादीनां तात्कालिकशुद्धि-विषयकविचारः, पतितादीनां आशौचाभावविषयकविचारश्च । यद्धवतु अत्र मया संक्षेपेण त्रिंशच्छलोकविवृत्याः प्रतिपादितविषयणां एका संक्षिप्तरूपरेखा उपस्थापिता। अत्र ग्रन्थकारेण रघुनाथेन आशौचव्यवस्थाविषये सम्यक् उपस्थापितमिति ।

**पादटिप्पणी -**

1. शब्दकल्पद्रुमः,पृष्ठा- 138
2. याज्ञवल्क्यस्मृतिः, मिताक्षरा, पृष्ठा- 367
3. त्रिंशच्छलोकविवृतिः, आशौचसंग्रहः, श्लोकः - 1
4. जन्माशौचान्तराले यदि शिशुनशनं नालवृद्धयूर्ध्वकाले
   निःप्राणो निःपतेद्वा जननजनितमाशौचमस्त्येव कृत्स्नम्।
   प्राङ्नाभिछेदनाच्चेन्निधनमुपगतस्तत्र्यहेणैवशुद्धिः
   सर्वेषां सूतिकायास्त्विह च सकलकं प्रेतशुद्धिस्तु सद्यः॥ त्रिंशच्छलोकविवृतिः, आशौचसंग्रहः, श्लोकः - 2
5. त्रिंशच्छलोकविवृतिः, आशौचसंग्रहः, श्लोकः - 3
6. त्रिंशच्छलोकविवृतिः, आशौचसंग्रहः, श्लोकः - 5
7. त्रिंशच्छलोकविवृतिः, आशौचसंग्रहः, श्लोकः - 6
8. तत्रैव
9. त्रिंशच्छलोकविवृतिः, आशौचसंग्रहः, श्लोकः – 7-9
10. त्रिंशच्छलोकविवृतिः, आशौचसंग्रहः, श्लोकः – 10
11. त्रिंशच्छलोकविवृतिः, आशौचसंग्रहः, श्लोकः – 11
12. त्रिंशच्छलोकविवृतिः, आशौचसंग्रहः, श्लोकः – 12
13. त्रिंशच्छलोकविवृतिः, आशौचसंग्रहः, श्लोकः – 13
14. त्रिंशच्छलोकविवृतिः, आशौचसंग्रहः, श्लोकः – 14
15. त्रिंशच्छलोकविवृतिः, आशौचसंग्रहः, श्लोकः – 15

**सन्दर्भग्रन्थसूची-**

1. पाण्डेय, आचार्य राजेन्द्र प्रसाद, (1996), धर्मद्रुम, चौखम्बा विद्याभवन, वाराणसी।

The Brāhmī, International Multidisciplinary Research Journal

(Peer Reviewed, Referred & Open Access Journal)

Volume: 01 | Issue: 04 | Dec-Feb 2025 | ISSN: 3048-9660 (Online) | www.thebrahmi.com

2. पाण्डेय, डॉ. उमेशचन्द्र, (1966), गौतमधर्मसूत्राणि, हरदत्तकृत-मिताक्षरावृत्ति-सहितानि, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी।
3. राय, डॉ. गङ्गासागर, (2007), याज्ञवल्क्यस्मृतिः, मिताक्षरा टीकासहिता, चौखम्बासंस्कृत प्रतिष्ठानम्, दिल्ली।
4. भट्टाचार्यः, त्रिंशच्छलोकी, आशौचसंग्रहः, मातृकारूपेण, भंडारकर ओरिएंटल रिसर्च इंस्टीट्यूट, पूणे, महाराष्ट्र।
5. भट्टः, रघुनाथः, त्रिंशच्छलोकीविवेचनम्, मातृकारूपेण, भंडारकर ओरिएंटल रिसर्च इंस्टीट्यूट, पूणे, महाराष्ट्र।
6. शब्दकल्पद्रुमः,(2002), राष्ट्रिय संस्कृत संस्थान, नई दिल्ली।